31-10-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यप्रथमपत्रम् ।

Page No.
Date / /

प्रश्नपत्रस्वरूपम् ।

1. स्वरसन्धिः कथं कदा वा भवति ? उदाहरणं ददतु ।

उत्तरम् → यदा प्रथम शब्दस्य अंतिमो वर्णः कोऽपि स्वरवर्णः भवति तथा द्वितीयशब्दस्य प्रथमो वर्णः कोऽपि स्वरवर्णः भवति तदा तौ वर्णौ परस्परं मिलित्वा सन्धिकार्यं कुरुतः । अस्मिनवस्थायां स्वरसन्धिः भवति । यथा → इति + अलम्

अत्र प्रथम शब्दस्य अंतिमो वर्णः तकारोत्तरवर्ती इकारः स्वरवर्णः अस्ति । द्वितीय शब्दस्य प्रथमो वर्णः लकारस्य पूर्ववर्ती वर्णः अकारः अस्ति । अस्मिन् स्थितौ इ स्थाने य् भूत्वा अकारेण सह मिलित्वा 'इत्यलम्' शब्दनिर्माणं भवति ।

इदम् उदाहरणं स्वरसन्धेः भेदः यण् सन्धेः अस्ति ।

2. स्वरसन्धेः पञ्चोदाहरणानि प्रदर्शयन्तु ।

उत्तरम् →

राम + अयनम् = रामायणम् (दीर्घ स्वरसन्धिः)
सूर्य + उदयः = सूर्योदयः (गुण " ")
एक + एकः = एकैकः (वृद्धि " ")
मधु + अरिः = मध्वरिः (यण् " ")
पो + अनः = पवनः (अयादि " ")

अवशिष्टानि प्रश्नोत्तराणि अन्वेष्टव्यः ।

31-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य
रा० उ० सं० महावि० सुरखसेना, पूर्णियाँ

31-10-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्य प्रथमपत्रम् ।

Page No.:
Date: / /

## प्रश्नपत्रस्वरूपम् उत्तरञ्च ।

1. √अस् धातोः रूपाणि लृट्लकारे लिखत ।

| | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| उत्तरम् → प्र०पु० | भविष्यति | भविष्यतः | भविष्यन्ति |
| म०पु० | भविष्यसि | भविष्यथः | भविष्यथ |
| उ०पु० | भविष्यामि | भविष्यावः | भविष्यामः |

2. √हन् धातोः रूपं लट्लकारे, प्रथमपुरुषे, एकवचने किं भवति ?

उत्तरम् → घ्नन्ति ।

3. √हन् धातोः रूपं लोट्लकारे, मध्यमपुरुषे, एकवचने लिखत ।

उत्तरम् → जहि / हतात् ।

4. 'ददति' क्रियापदं कस्य धातोः कस्मिन् पुरुषे वचने च

उत्तरम् → ददति क्रियापदं √दा धातोः लट्लकारे, प्रथमपुरुषे, बहुवचने रूपमस्ति ।

5. ददाति तथा च ददति पदयोर्मध्ये किमन्तरम् ?

ददाति - √दा, लट्, प्र०पु०, एकवचने रूपं ।
ददति - √दा, लट्, प्र०पु०, बहुवचने रूपं ।

यथा → सः मह्यं पुस्तकं ददाति ।
ते मह्यं पुस्तकानि ददति ।

अवशिष्टानि प्रश्नोत्तराणि अन्येद्युः ।

31-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

31-10-2020

साहित्यम् । शास्त्री

Page No.
Date :

प्रश्नः→ प्रदत्ते पद्ये छन्दालंकारौ विवेच्यताम् ।

श्रीशूद्रक / मृच्छकटिकम् → 1/13

" सत्यं न मे विभवनाशकृतास्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत्सौहृदादपि जनाः शिथिलीभवन्ति ॥"

उत्तरम् → विचारोपरान्ते ज्ञायते मया यत् प्रदत्तस्य पद्यस्य प्रत्येके चरणे चतुर्दश अक्षराः सन्ति । अतः अस्मिन् पद्ये शक्वरी छन्दः अस्ति । यगणादिनिर्णयः

→ सत्यं न मे विभवनाशकृतास्ति चिन्ता,

| ऽ ऽ । | ऽ । । | । ऽ । | । ऽ । | ऽ | ऽ |
|---|---|---|---|---|---|
| तगण | भगण | जगण | जगण | गु० | गुरु |

तगणादिनिर्णयं कृत्वा पूर्णरूपेण ज्ञायते यत् अत्र अस्मिन् पद्ये शक्वरी छन्दस्य भेदः वसन्ततिलका छन्दः अस्ति ।

अलङ्कारः → काव्यलिङ्गम् । तल्लक्षणम् →
" काव्यलिङ्गं हेतोर्वाक्यपदार्थता ।"

गुणः → प्रसादः ।
रीतिः → वैदर्भी ।

31-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ